# કામાખ્યદોષવિવરણમ્

kAmAkhyadoShavivaraNam

sanskritdocuments.org

March 17, 2018

# kAmAkhyadoShavivaraNam

# કામાખ્યદોષવિવરણમ્

## Sanskrit Document Information

Text title : kAmAkhyadoShavivaraNam

File name : kAmAkhyadoShavivaraNam.itx

Category : misc, puShTimArgIya, haridAsa, advice

Location : doc_z_misc_general

Author : haridAsa

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 17, 2018

*sanskritdocuments.org*

# કામાખ્યદોષવિવરણમ્

દોષેષુ પ્રથમઃ કામો વિવિચ્ય વિનિરૂપ્યતે ।
યસ્મિંહત્પદ્યતે તસ્ય નાશકઃ સર્વથા મતઃ ॥ ૧॥

વિષયાવેશહેતુત્વાદ્વિક્ષેપોત્પત્તિકારણમ્ ।
રજોગુણસમુત્પન્નો રજઃપ્રક્ષેપકો મુખે ॥ ૨॥

બ્રહ્માવેશવિરોધી ચ સદ્બુદ્ધેર્બાધકો મતઃ ।
સત્કર્મનાશકઃ સર્વપ્રાકૃતસક્તિસાધકઃ ॥ ૩॥

ચિત્તાશુદ્ધિનિદાનત્વાચ્ચિદુત્પત્તૌ ચ બાધકઃ ।
ભક્તિમાર્ગમહાદ્વેષ્ટા વૈરાગ્યાભાવસાધનાત્ ॥ ૪॥

સર્વત્રાપરિતોષશ્ચાનેન લોભસમુદ્ભવાત્ ।
યથાકથઞ્ચિત્ સામ્મુખ્યેન્દ્રિયવૈમુખ્યકારકઃ ॥ ૫॥

કામલોભૌ હરિપ્રાપ્તિપ્રતિબન્ધકપર્વતૌ ।
તાવુલ્લઙ્ઘ્ય ન શક્નોતિ ગન્તું કૃષ્ણાન્તિકં જનઃ ॥ ૬॥

સંસારમોહહેતુત્વાન્મનોદૂષણસાધનમ્ ।
અતઃ સેવાવિરોધી ચ યતઃ સા માનસી મતા ॥ ૭॥

નિરોધસ્ય મહાચ્છત્રુરન્યસ્ફૂર્તિકરો યતઃ ।
ગુણગાનસપત્નોઽપિ ન રોચન્તે ગુણા યતઃ ॥ ૮॥

વૈરાગ્યસાધકાઃ સર્વે કામિનસ્તે કથં પ્રિયાઃ ।
અત એવ હિ દૃશ્યન્તે ગુણશ્રવણવૈરિણઃ ॥ ૯॥

ક્રોધઃ સ્વકાર્યકરણાલ્લોભઃ પ્રાપ્ત્યાપિ શામ્યતિ ।
ઘૃતહોમે વહ્નિરિવ કામો ભોગેન વર્ધતે ॥ ૧૦॥

કામેન નાશિતમતિઃ પ્રતિષિદ્ધે પ્રવર્તતે ।
અગમ્યાગમને ચૌર્યે તથૈવાભક્ષ્યભક્ષણે ॥ ૧૧॥

યત ઉત્પદ્યતે ક્રોધો મહદદ્રોહસમુદ્ભવઃ ।
લોભોઽપિ જાયતે તસ્માત્સ ચાર્થવિષયે ભવેત્ ॥ ૧૨॥

સોઽર્થઃ પઞ્ચદશાનર્થમૂલં તત્ર પ્રવર્તતે ।
કામેનૈવ હિ કાર્પણ્યં કામિનીષુ સતાં મતમ્ ॥ ૧૩॥

પ્રાર્થયન્તિ યતસ્તુચ્છાં પ્રવેશ્ય વદને કરમ્ ।
પ્રિયવ્રતસુતો રાજા ભ્રષ્ટઃ કામેન સત્ફલાત્ ॥ ૧૪॥

આગ્નીધો વિષયાવેશાદૂર્વશીલોકમાપિતઃ ।
કામેન કાશ્યપો દૈત્યોત્પાદને હેતુતાં ગતાઃ ॥ ૧૫॥

નિવૃત્તસન્ધ્યાનિયમઃ પત્નીપ્રાર્થનમોહિતઃ ।
કામેન ચ શિવઃ કૃષ્ણયુવતીરૂપવઞ્ચિતઃ ॥ ૧૬॥

કામેન નારદઃ ષષ્ટિપુત્રાનજનયત્સ્વતઃ ।
ગર્વાભાવાય હરિણા દત્તઃ કામો મહાશનઃ ॥ ૧૭॥

કામેન ભરતસ્યાપિ હરિણત્ત્વં ભવાન્તરે ।
પુરઞ્જનોઽપિ કમને સ્ત્રીયોનિમુપલબ્ધવાન્ ॥ ૧૮॥

કામેન વેદગર્ભોઽપિ સ્વસુતાયાં તથાઽકરોત્ ।
તેનૈવ રાવણો બુદ્ધિં રમાયામન્યથાઽકરોત્ ॥ ૧૯॥

એવં હિ બહવો નષ્ટાઃ કામેનૈવ હિ સાધવઃ ।
ભક્તિમાર્ગે વિરોધસ્તુ તત્ર કામકૃતો મહાન્ ॥ ૨૦॥

કામિતઃ ફલવાઞ્છાતઃ શરણં નૈવ સિદ્ધ્યતિ ।
સાપેક્ષસ્ય તુ સર્વત્ર દુર્લભં હિ સમર્પણમ્ ॥ ૨૧॥

તદભાવે તદીયત્વં સર્વથૈવ હિ દુર્લભમ્ ।
સાધારણ્યેન બુદ્ધિઃ સ્યાત્તેન લીલાસ્થિતેષ્વપિ ॥ ૨૨॥

કામલેન યથા પીતપ્રતીતિરખિલે ભવેત્ ।
પઞ્ચાધ્યાય્યામતઃ પ્રોક્તં હૃદ્રોગત્ત્વં શુકૈરપિ ॥ ૨૩॥

દોષબુદ્ધિઃ કામિનસ્તુ ભવેલ્લીલાકૃતો હરેઃ ।
નિબન્ધે શ્રીમદાચાર્યૈરત ઇન્દ્રિયનિગ્રહે ॥ ૨૪॥

અત્યાગઃ સર્વથા પ્રોક્તો ભગવદ્ભક્તિસાધકઃ ।
કૌતુકાર્થમપિ ત્યાગો ધર્માર્થમપિ વર્જિતઃ ॥ ૨૫॥

સ્વયમિન્દ્રિયકાર્યાણીત્યુક્ત્યા ધૈર્યવિભઞ્જનઃ ।
વિવેકસ્ય વિરોધ્યેવ તદસ્ફૂર્તિકરો યતઃ ॥ ૨૬॥

આશ્રયસ્તુ કથં સિધ્યેન્મનોવિક્ષેપસમ્ભવાત્ ।
ભક્તિમાર્ગોઽપિ મૂલત્વાત્ત્યાગસ્ય ન હિ સિદ્ધ્યતિ ॥ ૨૭॥

બાહ્યપક્ષે કૃષ્ણયોગઃ સર્વથા ત્વાન્તરે મતઃ ।
પરં તૂભયથા ત્યાગો મૂલમન્ત્રં ન સંશયઃ ॥ ૨૮॥

કામે સતિ કથં ત્યાગઃ સાપેક્ષસ્ય પ્રસિદ્ધ્યતિ ।
તસ્માદ્વિચાર્ય તદ્રૂપં દુરતિક્રમણં સ્વતઃ ॥ ૨૯॥

શરણીકરણીયં શ્રીનિજાચાર્યપદામ્બુજમ્ ।
સાધનાનામભાવેઽપિ સ્વબલોઽખિલસાધનમ્ ॥ ૩૦॥

તત એવ ત નિસ્તારો દોષપોષયુતાત્મનામ્ ।
નાન્યા ગતિર્ગોકુલેશભજનાનન્દકાઙ્ક્ષિણામ્ ॥ ૩૧॥

ઇતિ શ્રીહરિદાસવિરચિતં કામાખ્યદોષવિવરણં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*kAmAkhyadoShavivaraNam*

pdf was typeset on March 17, 2018

Please send corrections to *sanskrit@cheerful.com*